# shivastavarAjaH

# શિવસ્તવરાજઃ

## Document Information

Text title : shivastavarAja

File name : shivastavarAja.itx

Category : shiva, stavarAja

Location : doc_shiva

Transliterated by : NA, Pallasena Narayanaswami

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Latest update : December 27, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 10, 2021

*sanskritdocuments.org*

# શિવસ્તવરાજઃ

શ્રીગણેશાય નમઃ ।
સૂત ઉવાચ ।
એકદા નારદો યોગી પરાનુગ્રહતત્પરઃ ।
વિમત્સરો વીતરાગો બ્રહ્મલોકમુપાયયૌ ॥ ૧॥

તત્ર દૃષ્ટ્વા સમાસીનં વિધાતારં જગત્પતિમ્ ।
પ્રણમ્ય શિરસા ભૂમૌ કૃતાઞ્જલિરભાષત ॥ ૨॥

નારદ ઉવાચ ।
બ્રહ્મઞ્જગત્પતે તાત નતોઽસ્મિ ત્વત્પદામ્બુજમ્ ।
કૃપયા પરયા દેવ યત્પૃછામિ તદુચ્યતામ્ ॥ ૩॥

શ્રુતિશાસ્ત્રપુરાણાનિ ત્વદાસ્યાત્સંશ્રુતાનિ ચ ।
તથાપિ મન્મનો યાતિ સન્દેહં મોહકારણમ્ ॥ ૪॥

સર્વમન્ત્રાધિકો મન્ત્રઃ સદા જાપ્યઃ ક ઉચ્યતે ।
સર્વધ્યાનાદિકં ધ્યાનં સદા ધ્યેયમિહાસ્તિ કિમ્ ॥ ૫॥

વેદોપનિષદાં સારમાયુઃશ્રીજયવર્ધનમ્ ।
મુક્તિકાઙ્ક્ષાપરૈર્નિત્યં કઃ સ્તવઃ પઠ્યતે બુધૈઃ ॥ ૬॥

ઇમં મત્સંશયં તાત સ્વં ભેત્તાસિ ન કશ્ચન ।
બ્રૂહિ કારુણ્યભાવેન મહ્યં શુશ્રૂષવે હિતમ્ ॥ ૭॥

શ્રુત્વાઽઙ્ગજવચો વેધા હૃદિ હર્ષમુપાગતઃ ।
દેવદેવં શિવાકાન્તં નત્વા ચાહ મુનીશ્વરમ્ ॥ ૮॥

બ્રહ્મોવાચ ।
સાધુ પૃષ્ટં મહાપ્રાજ્ઞ લોકાનુગ્રહતત્પર ।
સત્સર્વં તે પ્રવક્ષ્યામિ ગોપનીયં પ્રયત્નતઃ ॥ ૯॥

પ્રણવં પૂર્વમુચ્ચાર્ય નમઃશબ્દં સમુચ્ચરેત્ ।
સચતુર્થ્યૈકવચનં શિવં ચૈવ સમુચ્ચરેત્ ॥ ૧૦॥

એષ શૈવો મહામન્ત્રઃ ષડ્વર્ણાખ્યો વિમુક્તિદઃ ।
સર્વમન્ત્રાધિકઃ પ્રોક્તઃ શિવેન જ્ઞાનરૂપિણા ॥ ૧૧॥

અનેન મન્ત્રરાજેન નાશયિતું ન શક્યતે ।
તચ્ચ પાપં ન પશ્યામિ માર્ગમાણોઽપિ સર્વદા ॥ ૧૨॥

અયં સંસારદાવાગ્નિર્મોહસાગરવાડવઃ ।
તસ્માત્પ્રયત્નતઃ પુત્ર  મન્ત્રો ગ્રાહ્યો મુમુક્ષુભિઃ ॥ ૧૩॥

માતૃપુત્રાદિહા યોઽપિ વેદધર્મવિવર્જિતઃ ।
સકૃદુચ્ચારણાદસ્ય સાયુજ્યમુક્તિમાપ્નુયાત્ ॥ ૧૪॥

કિં પુનર્વક્ષ્યતે પુત્ર સ્વાચારપરિનિષ્ઠિતઃ ।
સર્વમન્ત્રાન્વિસૃજ્ય ત્વમિમં મન્ત્રં સદા જપ ॥ ૧૫॥

ધ્યાનં તેઽહં પ્રવક્ષ્યામિ જ્ઞાત્વા યન્મુચ્યતે ચિરાત્ ।
વેદોપનિષદોક્તં ચ યોગગમ્યં સનાતનમ્ ॥ ૧૬॥

ઇન્દ્રિયાણિ નિયમ્યાદૌ યતવાગ્યતમાનસઃ ।
સ્વસ્તિકાદ્યાસનયુતો હૃદિ ધ્યાનં સમારભેત્ ॥ ૧૭॥

નાભિનાલં હૃદિસ્થં ચ પઙ્કજં પરિકલ્પયેત્ ।
રક્તવર્ણમષ્ટદલં ચન્દ્રસૂર્યાદિશોભિતમ્ ॥ ૧૮॥

સમન્તાત્કલ્પવૃક્ષેણ વેષ્ટિતં કાન્તિમત્સદા ।
તન્મધ્યે શઙ્કરં ધ્યાયેદ્દેવદેવં જગદ્ગુરુમ્  ॥ ૧૯॥

કર્પૂરસદૃશં ચન્દ્રશેખરં શૂલપાણિનમ્ ।
ત્રિલોચન મહાદેવં દ્વિભુજં ભસ્મભૂષિતમ્ ॥ ૨૦॥ ।

પરાર્ધ્યભૂષણયુતં ક્વણન્નૂપુરમણ્ડિતમ્ ।
સરત્નમેખલાબદ્ધકટિવસ્ત્રં સકુણ્ડલમ્ ॥ ૨૧॥

નીલકણ્ઠં જટાવન્તં સકિરીટં સુશોભિતમ્ ।
ગ્રૈવેયાદિપ્રબન્ધાઢ્યં પાર્વતીસહિતં પુરમ્ ॥ ૨૨॥

કૃપાલું જગદાધારં સ્કન્દાદિપરિવેષ્ટિતમ્ ।
ઇન્દ્રેણ પૂજિતં યક્ષરાજેન વ્યઞ્જિતં વિભુમ્ ॥ ૨૩॥

પ્રેતરાજસ્તુતં નીરનાથેન નમિતં મુહુઃ ।
બ્રહ્મણા ગીયમાનં ચ  વિષ્ણુવન્દ્યં મુનિસ્તુતમ્ ॥ ૨૪॥

ધ્યાનમેતન્મયા ખ્યાતં સૂત વેદાન્તશેખરમ્ ।
સર્વપાપક્ષયકરં જયસમ્પત્તિવર્ધનમ્ ॥ ૨૫॥

અનેન સદૃશં તાત નાસ્તિ સંસારતારકમ્  ।
સર્વધ્યાનાદિકં ધ્યાનં ગોપનીયં સુત ત્વયા ॥ ૨૬॥

કાયવાઙ્માનસોત્થં યત્પાપમન્યચ્ચ વિદ્યતે ।
તત્સર્વં નાશમાયાતિ ધ્યાનાત્સત્યં વચો મમ ॥ ૨૭॥

વેદશાસ્ત્રપુરાણાનિ સેતિહાસાનિ યાનિ ચ ।
ધ્યાનસ્ય તાનિ સર્વાણિ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨૮॥

પ્રેમ્ણા કુરુ મહાભાગ ધ્યાનમેતદ્વિમુક્તિદમ્ ।
અથ તે વક્ષ્યહં  યોગિન્ સ્તવં સર્વોત્તમં ચ યત્ ॥ ૨૯॥

બ્રહ્માસ્યૈવ ઋષિઃ પ્રોક્તોઽનુષ્ટુપ્ છન્દઃ પ્રકીર્તિતમ્ ।
શિવો વૈ દૈવતં પ્રોક્તં બીજં મૃત્યુઞ્જયં મતમ્ ॥ ૩૦॥

કીલિકં નીલકણ્ઠશ્ચ શક્તિઃ પ્રોક્તા હરસ્તથા ।
નિયોગઃ સર્વસિદ્ધ્યર્થં મુક્તિકામાય વૈ મતઃ ॥ ૩૧॥

શિરસ્યાસ્યે હૃદિ પદે કટ્યાં બાહ્વોસ્તુ વ્યાપકે ।
ઋષયદીનિ ક્રમાદ્યુઞ્જેત્સાઙ્ગુષ્ટાઙ્ગુલિભિઃ સુત ॥ ૩૨॥

મન્ત્રન્યાસં  તતઃ કુર્યાચ્છૃણુ ચૈકાગ્રમાનસ્વઃ ।
ષડક્ષરાણિ યુઞ્જીયાદઙ્ગુષ્ઠાદ્યઙ્ગુલીષુ ચ ॥ ૩૩॥

હૃદયે ચ શિરસ્યેવ શિખાયાં કવચે યથા ।
નેત્રત્રયે તથાઽસ્ત્રે ચ વર્ણા હ્યેવં ચ ષટ ક્રમાત્ ॥ ૩૪॥

નમઃ સ્વાહા વષટ્ હું  ચ સર્વૌષટ્ ફટ્ક્રમો વદેત્ ।
મન્ત્રન્યાસમિમં કૃત્વા સ્તવન્યામં સામાચરેત્ ॥ ૩૫॥

શિવં મૃડં પશુપતિં શઙ્કરં ચન્દ્રશેખરમ્ ।
ભવં ચૈવ ક્રમાદેવમઙ્ગુષ્ટાદિહૃદાદિષુ ॥ ૩૬॥

સર્વન્યાસાન્પ્રયુઞ્જીત ચતુર્થીસહિતાન્સુત ।

નમોયુતાન્નમશ્ચૈવ શિરસાદિષુ વર્જયેત્ ॥ ૩૭॥

શિવં સર્વાત્મકં સર્વપતિં સર્વજનપ્રિયમ્ ।
સર્વદુઃખહરં ચૈવ મોહનં ગિરિશં ભજે ॥ ૩૮॥

કામઘ્નં  કામદં કાન્તં કાલમૃત્યુનિવર્તકમ્ ।
કલાવન્તં કલાધીશં  વન્દેઽહં ગિરિજાપતિમ્ ॥ ૩૯॥

પરેશં પરમં દેવં પરમ્બ્રહ્મ  પરાત્પરમ્ ।
પરપીડાહરં  નિત્યં પ્રણમામિ વૃષધ્વજમ્ ॥ ૪૦॥

લોકેશં લોકવન્દ્યં ચ લોકકર્તારમીશ્વરમ્ ।
લોકપાલં હરં વન્દે ધીરં શશિવિભૂષણમ્ ॥ ૪૧॥

શિવાપતિં ગિરિપતિં  સર્વદેવપતિં વિભુમ્ ।
પ્રમથાધિપતિં સૂક્ષ્મં નૌમ્યહં શિખિલોચનમ્ ॥ ૪૨॥

ભૂતેશં ભૂતનાથં ચ ભૂતપ્રેતવિનાશનમ્ ।
ભૂધર ભૂપતિં શાન્તં શૂલપાણિમહં ભજે ॥ ૪૩॥

કૈલાસવાસિનં રૌદ્રં ફણિરાજવિભૂષણમ્ ।
ફણિબધ્દજટાજૂટં  પ્રણમામિ સદાશિવમ્ ॥ ૪૪॥

નીલકણ્ઠં દશભુજં ત્ર્યક્ષં ધૂમ્રવિલોચનમ્ ।
દિગમ્બરં દિશાધીશં નમામિ વિષભૂષણમ્ ॥ ૪૫॥

મુક્તીશં મુક્તિદં મુક્તં મુક્તગમ્યં સનાતનમ્ ।
સત્પતિં નિર્મલં શમ્ભું નતોઽસ્મિ સકલાર્થદમ્  ॥ ૪૬॥

વિશ્વેશં વિશ્વનાથં ચ વિશ્વપાલનતત્પરમ્ ।
વિશ્વમૂર્તિં વિશ્વહરં પ્રણમામિ જટાધરમ્ ॥ ૪૭॥

ગઙ્ગાધરં કપાલાક્ષં પઞ્ચવક્ત્રં  ત્રિલોચનમ્ ।
વિદ્યુત્કોટિપ્રતીકાશં વન્દઽહં પાર્વતાપતિમ્ ॥ ૪૮॥

સ્ફટિકાભં જનાર્તિઘ્નં દેવદેવમુમાપતિમ્ ।
ત્રિપુરારિં ત્રિલોકેશં  નતોઽસ્મિ ભવતારકમ્ ॥ ૪૯॥

અવ્યક્તમક્ષરં દાન્તં મોહસાગરતારકમ્ ।
સ્તુતિપ્રીયં ભક્તિગમ્યં સદા વન્દે  હરિપ્રિયમ્ ॥ ૫૦॥

અમલં નિર્મલં નાથમપમૃત્યુભયાપહમ્ ।
ભીમયુદ્ધકરં ભીમવરદં તં નતોઽસ્મ્યહમ્ ॥ ૫૧॥

હરિચક્રપ્રદં યોગિધ્યેયમૂર્તિં સુમઙ્ગલમ્ ।
ગજચર્માંમ્બરધરં પ્રણમામિ વિભૂતિદમ્ ॥ ૫૨॥

આનન્દકારિણં સોમ્યં સુન્દરં ભુવનેશ્વરમ્ ।
કાશીપ્રિયં કાશિરાજં વરદં પ્રણતોઽસ્મ્યહમ્ ॥ ૫૩॥

શ્મશાનવસિનં ભવ્યં ગ્રહપીડાવિનાશનમ્ ।
મહાન્તં પ્રણવં યોગં ભજેઽહં દીનરક્ષકમ્ ॥ ૫૪॥

જ્યોતિર્મયં જ્યોતિરૂપં જિતક્રોધં તપસ્વિનમ્ ।
અનન્તં સ્વર્ગદં સ્વર્ગપાલં વન્દે નિરઞ્જનમ્ ॥ ૫૫॥

વેદવેદ્યં પાપહરં ગુપ્તનાથમતીન્દ્રિયમ્ ।
સત્યાત્મકં સત્યહરં નિરીહં તં નતોઽસ્મ્યહમ્ ॥ ૫૬॥

દ્વીપિચર્મોત્તરીયં ચ શવમૂર્ધાવિભૂષણમ્ ।
અસ્થિમાલં શ્વેતવર્ણં નમામિ ચન્દ્રશેખરમ્ ॥ ૫૭॥

શૂલિનં સર્વભૂતસ્થં ભક્તોદ્ધરણસંસ્થિતમ્ ।
લિઙ્ગમૂર્તિં સિદ્ધસેવ્યં સિદ્ધસિદ્ધિપ્રદાયકમ્ ॥ ૫૮॥

અનાદિનિધનાખ્યં તં રામસેવ્યં જયપ્રદમ્ ।
યોધાદિં યજ્ઞભોક્તારં વન્દે નિત્યં પરાવરમ્ ॥ ૫૯॥

અચિન્ત્યમચલં વિષ્ણું મહાભાગવતોત્તમમ્ ।
પરધ્યં પરવેદ્યં ચ વન્દે વૈકુણ્ઠનાયકમ્ ॥ ૬૦॥

આનન્દં નિર્ભયં ભક્તવાઞ્છિતાર્થપ્રદાયકમ્ ।
ભવાનીપતિમાચાર્યં વન્દેઽહં નન્દિકેશ્વરમ્ ॥ ૬૧॥

સોમપ્રિયં સોમનાથં યક્ષરાજનિષેવિતમ્ ।
સર્વાધારં સુવિસ્તારં પ્રણમામિ વિભૂતિદમ્ ॥ ૬૨॥

અનન્તનામાનમનન્તરૂપમનાદિમધ્યાન્તમનાદિસત્વમ્ ।
ચિદ્રૂપમેકં ભવનાગસિંહં ભજામિ નિત્યં ભુવનાધિનાથમ્ ॥ ૬૩॥

વેદોપગીતં વિધુશેખરં ચ સુરારિનાથાર્ચિતપાદપદ્મમ્ ।
કર્પૂરગૌરં ભુજગેન્દ્રહારં જાનામિ તત્ત્વં શિવમેવ નાન્યમ્ ॥ ૬૪॥

ગણાધિણાથં શિતિકણ્ઠમાદ્યં તેજસ્વિનં સર્વમનોભિરામમ્ ।
સર્વજ્ઞમીશં જગદાત્મકં ચ પઞ્ચાનનં નિત્યમહં નમામિ ॥ ૬૫॥

વિશ્વસૃજં નૃત્યકરં પ્રિયં તં વિશ્વાત્મકં વિશ્વવિધૂતપાપમ્ ।
મૃત્યુઞ્જયં ભાલવિલોચનં ચ ચેતઃ સદા ચિન્તય દેવદેવમ્ ॥ ૬૬॥

કપાલિનં સર્પકૃતાવતંસં મનોવચોગોચરમમ્બુજાક્ષમ્ ।
ક્ષમામ્બુધિં દીનદયાકરં તં નમામિ નિત્યં ભવરોગવૈદ્યમ્ ॥ ૬૭॥

સર્વાન્તરસ્થં જગદાદિહેતું કાલજ્ઞમાત્માનમનન્તપાદમ્ ।
અનન્તબાહૂદરમસ્તકાક્ષં લલાટનેત્રં ભજ ચન્દ્રમૌલિમ્ ॥ ૬૮॥

સર્વપ્રદં ભક્તસુખાવહં ચ પુષ્પાયુધાદિપ્રણતિપ્રિયં ચ ।
ત્રિલોકનાથં ઋણબન્ધનાશં ભજસ્વ નિત્યં પ્રણતાર્તિનાશમ્ ॥ ૬૯॥

આનન્દમૂર્તિં સુખકલ્પવૃક્ષં કુમારનાથં વિધૃતપ્રપઞ્ચમ્ ।
યજ્ઞાદિનાથં પરમપ્રકાશં નમામિ વિશ્વમ્ભરમીશિતારમ્ ॥ ૭૦॥

ઇત્યેવં સ્તવમાખ્યાતં શિવસ્ય પરમાત્મનઃ ।
પાપક્ષયકરં પુત્ર સાયુજ્યમુક્તિદાયકમ્ ॥ ૭૧॥

સર્વરોગહરં મોક્ષપ્રદં સિદ્ધિપ્રદાયકમ્ ।
માઙ્ગલ્યં ભુક્તિમુક્ત્યાદિસાધનં જયવર્ધનમ્ ॥ ૭૨॥

સર્વસ્તવોત્તમં વિદ્ધિ સર્વવેદાન્તશેખરમ્ ।
પઠસ્વાનુદિનં તાત પ્રેમ્ણા ભક્ત્યા વિશુદ્ધિકૃત્ ॥ ૭૩॥

ગોહા સ્ત્રીબાલવિપ્રાદિહન્તાન્યત્પાપકૃત્તથા ।
વિશ્વાસઘાતચારી ચ ખાદ્યપેયાદિદૂષકઃ ॥ ૭૪॥

કોટિજન્માર્જિતૈઃ પાપૈરસંખ્યાતૈશ્ચ વેષ્ટિતઃ ।
અષ્ટોત્તરશતાત્પાઠાત્ શુદ્ધો ભવતિ નિશ્ચિતમ્ ॥ ૭૫॥

મહારોગયુતો વાપિ મૃત્યુગ્રહયુતસ્તથા ।
ત્રિંશત્તદસ્ય પઠનાત્સર્વદુઃખં વિનશ્યતિ ॥ ૭૬॥

રાજવશ્યે સહસ્રં તુ સ્ત્રીવશ્યે ચ તદર્ધકમ્ ।
મિત્રવશ્યે પઞ્ચશતં પાઠં કુર્યાત્સમાહિતઃ ॥ ૭૭॥

લક્ષપાઠાદ્ભવેચ્ચૈવ શિવ એવ ન સંશયઃ ।

બહુના કિમિહોક્તેન ભાવનાસિદ્ધિદાયકઃ ॥ ૭૮॥

પાર્વત્યા સહિતં ગિરીન્દ્રશિખરે મુક્તામયે સુન્દરે
પીઠે સંસ્થિનમિન્દુશેખરમહર્નાથાદિસંસેવિતમ્ ।
પઞ્ચાસ્યં ફણિરાજકઙ્કણધરં ગઙ્ગાધરં શૂલિનં
ત્ર્યક્ષં પાપહરં નમામિ સતતં પદ્માસનસ્થં શિવમ્ ॥ ૭૯॥

ઇતિ શ્રીપદ્મપુરાણે બ્રહ્મનારદસંવાદે શિવસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*shivastavarAjaH*

pdf was typeset on June 10, 2021

Please send corrections to *sanskrit@cheerful.com*